१. एकदा, कश्चित् शृगालः आहारम् अन्वेष्टुं ग्रामं गतवान् ।

२. ग्रामस्य शृगालाः तम् अनुद्रुतवन्तः ।

३. वेगेन धावन् सः शृगालः नीलजलस्य भाण्डे पतितवान् ।

४. किञ्चित्कालानन्तरं बहिः आगतवान् ।

५. सः वेगेन वनं प्रति धावितवान् ।

६. अपूर्वं नीलमृगं दृष्ट्वा वनस्य सर्वे प्राणिनः भीतवन्तः ।

७. शृगालः तान् उक्तवान् – "अद्य भगवान् ब्रह्मा मां सृष्टवान् । सः मां वनस्य महाराजं कृतवान् । युष्माभिः सर्वैः मम आज्ञा पालनीया" इति ।

८. एवं सः शृगालः कानिचन दिनानि वनं शिष्टवान् ।

९. एकस्मिन् दिने सः दूरात् केषाञ्चन शृगालानां क्रन्दनं श्रुतवान् ।

१०. आत्मानं विस्मृत्य सः उच्चैः क्रन्दितुम् आरब्धवान् ।

११. तस्य क्रन्दनं श्रुत्वा सः नीलमृगः शृगालः एव इति सर्वे प्राणिनः ज्ञातवन्तः ।

१२. ते तं धूर्तं शृगालम् अनुद्रुत्य मारितवन्तः ।